TEXT PROBLEM WITHIN THE BOOK ONLY

# पद्यपुष्पाञ्जलिः

# Padya Pushpanjali

184458

BY
V. SUBRAHMANYA IYER B.A., L.T.
PRINCIPAL
Rameswaram Devasthanam
Sanskrit College
MADURAI.



S 81
S 94 P

UNIVERSAL
LIBRARY
OU_184458
UNIVERSAL
LIBRARY

**OSMANIA UNIVERSITY LIBRARY**

Call No S81 S94 P Accession No GS 106

Author [illegible]

Title [illegible]

This book should be returned on or before the date last marked below

॥ श्रीः ॥

# ॥ पद्यपुष्पाञ्जलिः ॥

एट्टयपुरवास्तव्य वल्लीपरिणयचंप्वादि-
कर्तृ कविकेसरिस्वामिदीक्षित भ्रातृ-
वेंकटाचलयज्वतनूजेन
विद्यारत्न साहितीवल्लभ साहित्यालंकार
विरुद् भाजा मधुरानगरी विद्योतमान
श्रीरामेश्वरदेवस्थानपाठशालाध्यक्षेण

## सुब्रह्मण्यार्येण

विरचितः ॥

पुराणमित्येव न साधु सर्वं
न चापि काव्यं नवमित्यवद्यं ।
सन्त परिक्ष्यान्यतरद् भजन्ते
मूढ परप्रत्ययनेयबुद्धिः ॥ — कालिदास

# ॥ विषयानुक्रमः ॥

Page

Foreword . i

An appreciative evaluation by
Sri K. S. Ramaswami Sastrigal .. iv

A letter of felicitations by Dr. C. Kunhan Raja vii

Author's preface .. .. viii

**पूर्व भाग:**

1. संसारस्तव: १
2. ऋषिसंस्मरणम २
3. कविताप्रासाद ४
4. पारम्पर्यम ६
5. प्रकृति कला च ७
6. शकुन्तलास्वगतम ९
7. अद्भुत भारतम १२
8. भीष्म महात्याग. १४
9. वाग्वैभवम् १८
10. श्रमप्रशंसा २०
11. रजोविलास: २२
12. सती २४
13. प्रज्ञाविपरिणति २७
14. इहलोक २८

| | | |
|---|---|---|
| **16.** | The eight divine forms | 22 |
| **17.** | Noise nuisance | 23 |
| **18** | Scavenging | 24 |
| **19.** | Female | 25 |
| **20.** | Penance-minded-ness | 26 |
| **21.** | Self-reliance | 27 |
| **22.** | Then and Now | 28 |
| **23.** | Children's Paradise | 29 |
| **24.** | Elements sport | 30 |
| **25** | Earth's Burden | 31 |

# FOREWORD

This work deserves to be introduced to the public by more competent men than myself. But Principal Subrahmanya Sastry's friendship for me has overborne his sense of values and propriety.

Possessing talents of a high order in Sanskrit grammar and Shastras, he has proved by this work that he can also take rank among Sanskrit poets He has covered within a short space an interesting variety of subjects and has brought his poetic skill to bear on them with consummate art. The subjects dealt with are largely those which will appeal to the modern mind. We have 'संसारस्तव' or the song of life, the refrain being "धर्म्याणि कर्माणि सदाकुरुत्वं", which means 'be always doing righteous acts.' That there can be no exclusiveness or isolation in the modern world, but that societies and individuals are interdependent on each other, is the theme of a set of verses entitled "पारस्पर्यम् " Reflections on the dignity of labour and the inter-relation of nature and art furnish proof of a penetratively observant mind. The grip which the Rajoguna has over life is emphasized and expatiated upon in ten striking verses under the heading रजोविलास. In कविताप्रासाद (Palace of poetry) the author has displayed a rather original poetic conceit, envisaging poetry as a

nd palace, the foundations of which were laid by lmiki and Vyasa, and an imposing edifice, consisting beautiful halls and rooms and collonades, was built skilled architects like Kalidasa, Bhasa, Aswaghosha l Bhavabhuti. The pre-potent but subtle influence elded by woman over man is described in 5 slokas ler the caption स्त्री. The greatness of Bhishma, Kaurava warrior, who was the very embodiment Hindu Dharma and culture comes in for just praise. this poem one would have expected a reference, ugh very brief at least, to the encounter, wordy as l as physical, between Bhishma and Parasurama rated in the Udyoga-parva of the Maha-bharata. अद्भुत भारतम्, the author thinks more of the India he past than of the present. Glory and renown many fields of knowledge and achievement were ia's characteristics in ancient days. But today, re can be little doubt that she is shorn of all such tments and presents a picture of economic distress, itical troubles and intellectual barrenness or sterility. e story is neatly told of Moti, the Rajput nurse, o sacrificed her own child for preserving the prince al and later on, put an end to her own life so that she y keep company with the little one, whom she patched to the other world in circumstances of ving tragedy. King Canute's superlative haughti-

ness and humiliation, the anecdote of Solomon and the bees, lessons from the life of the Lord of Burleigh, the mastery of instinct over self-control, are dealt with tersely in easy verse.

The learned author wants his effort to be judged by its intrinsic merits and that it should not be relegated to the back-ground as there is nothing new in it, which has not already been said before. In this connection he quotes the famous verse of Kalidasa पुराणमित्येव न साधु सर्वं न चापि काव्यं नवमित्यवद्यं । सन्तः परीक्ष्यान्यतरद्भजन्ते मूढः परप्रत्ययनेयबुद्धिः ॥

This is a legitimate claim for him to make. There can be nothing but praise for this attractive collection of verses. The style employed is simple, and there is lilt and flow of language: the metres employed are appropriate, and the ideas of the author are fertile. Mostly he is on *terra firma* and does not allow his poetic imagination to run riot. Poetry of this kind is welcome and is bound to be widely appreciated. Lovers of Sanskrit owe a deep debt of gratitude to the distinguished author for this laudable enterprise.

New Delhi<br>
11—1—1951.

N. CHANDRASEKHARA AIYAR

**An appreciative evaluation by**

**Dewan Bahadur Sri K. S. RAMASWAMI SASTRIGAL**

**Retired District Judge, Madras.**

---

I have perused with much pleasure and profit the book of Sanskrit poems entitled PADYA-PUSHPANJALI by Mr. V. Subrahmanya Iyer, Principal, Rameswaram Devasthanam Patasala, Madurai. That such a work should appear in 1950 is itself proof of what Pandit Jawaharlal Nehru describes as the "VITALITY AND PERSISTENCE OF SANSKRIT" in his immortal work entitled "The Discovery of India." I am penning this appreciative evaluation of these excellent and original poems on 26th January, 1950, which is the day of the inauguration of the Indian Republic – a fact which is symbolical of the new spirit pervading these poems as the Republic is symbolic of the new spirit pervading the life of India.

For centuries past, Sanskrit poetry has been merely the pouring of mental molten metal into old moulds. Traditional themes and conventional sentiments ruled the minds from generation to generation. The author of this work has broken new ground and expresses the variegated panorama of modern Indian life with a refreshing modernity of outlook without in any way sacrificing Indian idealism or deflating the ethical and spiritual values of Indian thought and life.

I may refer first to his translations of some beautiful modern English poems and some original poems on western themes of high emotional sweetness The poems GODIVA and BURLEIGH-PRABHUH are not merely translations of two of Tennyson's splendid poems but are original poems bringing out well the inner spirit of the themes The poem TANTU VAYA SILASA brings out the chastening beauty of the transformation of Silas Marner's soul by Eppie who was God's gift to a man who had lost his entire store of wealth The poem PRAVARANA BHASHITAM takes a Japanese fairy tale and distils its emotional essence in simple and lovely verses throbbing with feeling The poem UPAHARA is another fine poem breathing the sublime spirit of sacrifice. The poem on BISHOP HATTO is another fine gem combining humour and sentiment. There are splendid poems full of lofty emotion on Indian themes like DHATRI MOTI (NURSE MOTI), MANIKYA HARA etc.

Another novel and charming feature is that even the poems on old themes and religious subjects have a newness and directness and modernity of sentiment and presentation. The poem KANAKA PATTIKA shows the glory of compassion. The poem SAKUNTALA'S SOLILOQUY presents an old theme from a subjective angle of vision and with a new intensity of emotion. BHISHMA MAHATYAGA presents another old theme from a psychological point of view. RISHI SAMSMARANAM expresses our debt to sages in a new manner. ADBHUTABHARATAM, VAGVAIBHAVAM, SATI, ASHTAMURTISWAROOPAM, TAPASSILATA, KAVITA-PRASADA etc., are other poems full of new and fine moods on old themes.

In my opinion, the poems in which we see combined originality and modernity and beauty are those in which modern responses to life in India are sought to be picturesquely yet truly expressed. The poem SAMSARASTAVA (Song of Life) expresses the new mood of joyous acceptance of life The poem PARASPARYAM (interdependence), expresses the need of reciprocal service. SRAMAPRASAMSA is a poem on work and labour. 'STRI' is a poem on feminine beauty and grace. VIRAVOPADRAVAH denounces the modern noise-nuisance. AVASKARAHARANAM exalts the bhangi SISUSWARGA describes the glory of childhood which Tagore describes as the Crescent Moon.

Thus these poems are altogether in a new vein and are graceful, charming and are replete with fine thoughts expressed in diverse metres suited to the thoughts. I wish the work wide and ever increasing public appreciation.

Madras,<br>26th January, 1950.

K. S RAMASWAMI SASTRI.

# A LETTER OF FELICITATIONS

C. KUNHAN RAJA.

University of Madra
Triplicane, (Madras
7th March, 1950.

Dear Mr. Subrahmanya Ayyar,

I had occasion to read your poetic compositions in th "Samskritam" very often I was very happy to have th opportunity of reading some of your recent compositions i manuscript form, which you gave me. I read through then very carefully.

Many people have said that Sanskrit just contain some good poetry and that it can be used by Pandits fo discussing certain worn out theories on philosophical subjects But I have always held the view that Sanskrit is still growin and is full of virility. You have shown that what I have saic is correct, through your compositions.

You command Sanskrit as a living language. Th wide field you cover and the variety of subjects you handle show that Sanskrit can serve for all sorts of purposes even i modern times and many of your themes are of living interest

The simplicity of your language and the lucidity o your expression show clearly that Sanskrit is a living languag and that there is no touch of artificiality in it. Your versifi cation is extremely natural.

You also show a rare command of metres and Sanskrit ontains a very large number of metres, unparalleled in any ther language.

If your compositions can be published, they will be a eal contribution to Sanskrit and also to the literary output n the country Kindly accept my very hearty felicitations n your poems I must also thank you for proving my view bout Sanskrit being a living language, through the way in hich you handle the language

*Yours sincerely,*

C. KUNHAN RAJA.

# AUTHOR'S PREFACE.

The good reception that these short poems had when they were read out to some of my friends here and elsewhere gave me the courage to present them to the general reader in the form of a book. Several of these were published in the years 1949 and 1950 in the "Samskritam" the Sanskrit weekly of Ayodhya to the editor of which I take this opportunity to express my thanks.

The collection consists of two parts. The first part contains pieces of a reflective nature and the second part narrations. The poems have been arranged in the chronological order of their composition. The pieces in the second part were written earlier than those in the first.

My most sincere thanks are due to the Hon'ble Justice Shri N. Chandrasekhara Iyer for having interested himself in writing a foreword to this book. I am deeply indebted to Dewan Bahadur Shri K. S. Ramaswami Sastrigal for his appreciative evaluation and to Dr. C. Kunhan Raja, M. A., Ph. D., for his letter of felicitations.

Due to the time spirit I have had to append an English translation of Part I for the benefit of those who are not as conversant with the glories of Daivi Vak as they should be. I hope the cognoscenti will excuse me for it.

I cannot adequately express my deep sense of gratefulness to Shris R. Ramjeedoss Iyer, Zamindar of Kannivadi, N. M. R. Subbaraman M.L.A., Madurai and A. Vaidyanatha Iyer, B. A., B. L., M. L. A., Advocate Madurai for their substantial financial help for the publication of this book

Lastly, my sincere thanks are expressed to the proprietors of Sri Ramakrishna Press, Madurai for their prompt and neat execution of the work

Madurai,
30—4—51

V. Subrahmanya Iyer

# SOME ADVANCE OPINIONS.

**The Hon'ble Shri K. M. Munshi, Minister for Food and Agriculture, Govt of India.**

. . I find your Sanskrit poems interesting

**Shri Govindlal H. Bhatt M.A., Professor of Sanskrit University of Baroda and Ag. Director, Oriental Institute, Baroda**

. .. ......The learned author has succeeded in proving beyond doubt the wonderful force of the Sanskrit language wherein all the topics under the Sun can be graphically described The variety of subjects including even some of the most important problems of the day, the mastery over language and the natural expression in suitable metres entitle the author to a high place in the galaxy of Sanskrit poets .....

**Dr. A. Sharma, M.A., D. Phil. Professor & Head of the Department of Sanskrit, Osmania University, Hyderabad.**

It was a pleasant surprise for me to go through your "Padyapushpanjali", which is a successful experiment in presenting modern, even foreign, thought and themes through the medium of Sanskrit. The contribution of modern India to Sanskrit poetry is not negligible, although unfortunately

not duly recognised. But few modern Sanskrit poets, if any, have dared to deviate from the beaten track of poetic tradition and ventured, as you have done, on an experiment of 'modernizing' Sanskrit Lyric—without disturbing Sanskrit idiom and expression.

It is no exaggeration to say that the pieces contianed in your 'Nosegay' are sure to prove a source of delight to every 'Sahrdaya.' By the way, they also serve as a prool of the vitality and pliability of the Sanskrit language, which can be used as a vehicle of modern thought as well as of ancient lore . .........

**The Hon'ble Justice Shri A. S. P. Ayyar, M. A, I.C S., F. R. S. L. Bar-at-Law, Judge, Madras High Court –**

........... Long ago, in England, to an English audience of Latin, Greek and English scholars, I delivered a lecture on Sanskrit and said.— "Sanskrit is not dead -— can never die — though the old days are gone, and the old Kings are departed. It will continue to live so long as the Hindu race is alive, nay, indeed, so long as man cherishes lofty thoughts couched in sublime words. Man, the younger brother of the gods will certainly not abandon this language of the gods, though, now and then, when he reverts to his other capacity, of elder brother of the animals, he may fume or scoff at learning this difficult language and advocate the study of only the much easier modern languages. This is not peculiar to India; the same thing is found in western countries regarding

he study of Latin and Greek and in modern Turkey, regarding Arabic and Persian. But, when the animal needs are ver, and leisure comes, the human heart craves for something higher than a work-a-day language and scoffs at the ery difficulty which it sought to avoid before This is only atural just as a hungry man hates the delay involved in vashing his hands and waiting for the dishes to come, before eginning his repast, but the same man will not only wash is hands but also put on a special dress-suit and wait for uests when his work is over and he is entertaining. So, no ne need despair about the future of Sanskrit. By its intrinsic reatness, Sanskrit is as free from the need for public popuarity as an elephant in a procession is from the need for many eople to follow it." Your book shows the correctness of my pinion, and I congratulate you on it and the variety of ubjects, ancient and modern, including Scavenging! The verses run smoothly, and nobody will suspect that they are n a language 6000 years old. ...........

---

**Sri T. S. Balasubrahmanya Ayyar, M. A. L. T., nspector of Oriental Schools, Madras State:**

.. .... the compositions are very well written, the style fluent, diction good and ideas novel. I am sure you will apply yourself earnestly and, ere long, you will attempt o publish your writings so that sahridayas may read and enjoy them...........

**Rao Sahib Sri N. Natesa Aiyer, B.A.,B.L., Supreme Court Advocate, Arupathi:**

............the encomiums your works are receiving are in no way exaggerations. They possess in them a rare combination of all the qualities which carry appeal to the modern public who, as you know, have no leisure or patience for high sounding phrases, grandiloquent word-paintings, क्लिष्टकल्पनाs and strained अलंकारs. Fresh, striking ideas and concepts clothed in simple, mellifluous language free from pedantry and ambitious exhibition of scholarship in verse or prose are what are wanted now and your compositions are having them in abundance............

---

**Shri K. Balasubramania Aiyar, B.A.,B L., Advocate "Ashrama" Luz. Mylapore.**

Principal Subrahmanya Aiyar has kindly requested me to give my impressions after perusing his book of Sanskrit poems entitled " Padya Pushpanjali ".

Mr. Subrahmanya Aiyar commands a simple, lucid and charming poetic style He possesses all the qualifications that are necessary for being a reputed author of Sanskrit Kavyas. He has dealt with a variety of subjects forming the theme of his poems and exhibits originality and versatility. The fact that he has been able to secure appreciations from scholars like the Hon'ble Mr. Justice N Chandrasekhara Aiyar, Sri K. S. Ramaswami Sastry and Dr. Kunhan Raja is clear proof to the reader of the true merit of his poetry and of his Sanskrit scholarship. I have great pleasure in commending this book to the Sanskrit loving world.

---

श्रीः

# ॥ पद्यपुष्पाञ्जलिः ॥

वन्दे गजास्यं सकलैर्निषेव्यं विघ्नौघहन्तार मुमाकुमारं ।
पूर्णं पुराणं गणनाथमीशं कविं प्रसन्न निखिलार्थसिद्ध्यै ॥

स्मरामि पितरं नित्यं कविं कर्मपरायणम् ।
पितृव्यंच जगत्ख्यातं कविकेसरिणं गुरून् ॥

## ॥ पूर्व भागः ॥

### 1 ॥ संसारस्तवः ॥

मा ब्रूहि संसारमसारमेतं विषादगर्भैर्वचनै कदापि ।
सत्योऽस्ति न स्वप्नमयः प्रपञ्चो धर्म्याणि कर्माणि सदा कुरु त्वम् ॥ १

भूतं लयं गच्छति नित्यताब्धौ गूढं तमिस्रेच भविष्यदेव ।
दृश्यंच जीवद्भुवि वर्तमानं धर्म्याणि कर्माणि सदा कुरु त्वम् ॥ २

देहो न बन्धाय तु कामनैव तां छिन्धि सद्योभवतीहमोक्षः ।
अस्यानुवृत्तिश्च शरीरपाते धर्म्याणि कर्माणि सदा कुरु त्वम् ॥ ३

निवर्तते नैव गतक्षणो नु कालस्य वेगः खलु तादृशोऽस्ति ।
संशय्यते यद्भवतोऽपिसत्ता धर्म्याणि कर्माणि सदा कुरु त्वम् ॥ ४

नैकान्ततो जन्म सुखं न दुःखं सुखं कुरु त्वं समतावलम्बात् ।
त्यजाथवोभे स्थिरधीर्भवन्वै धर्म्याणि कर्माणि सदा कुरु त्वम् ॥ ५

मुक्त्वा स्वकीयत्वमतिं क्रियासु चेष्टस्व बुद्ध्या जगतः क्रियेति ।
अवाप्यते चाभ्यसनादियंधी धर्म्याणि कर्माणि सदा कुरु त्वम् ॥ ६

अण्वस्त्रपातेऽप्यचलो भवेस्त्वं बुद्धिस्त्वदीया यदि निश्चितैवं ।
तर्केषु तुष्टिंकुरु माऽस्थिरेषु धर्म्याणि कर्माणि सदा कुरु त्वम् ॥ ७

अव्यक्त आदिर्हि तथैव चान्तो व्यक्तस्तु मध्यो भवतीह भाग्यात् ।
असत्यबुद्धिं प्रविहाय तस्मिन् धर्म्याणि कर्माणि सदा कुरु त्वम् ॥ ८

---

## 2 ॥ ऋषिसंस्मरणम् ॥

वचनमकृतकं तत्प्रसूतं यन्मुखेभ्यो
जगदखिलमपश्यन्ध्यानयोगेन येच ।
हुतभुजि सकला वै देवता यैरिहेष्टा
भवतु नतिरियं तत्प्राक्तनेभ्यो मुनिभ्यः ॥ १

असुरपणिमुखानामाकृतीः प्राप्यच प्रा-
गधिधरणि चरन्तीः पापशक्तीस्तपोभिः ।
नरकुलसुखहन्त्रीः लोपयामासुरुग्रै-
र्महितशमगुणा ये ज्योतिषा दीप्तवह्नेः ॥ २

विपुलतरमभूद्यन्मानसं विश्वतोऽपि
प्रतनुतरमणिष्ठादप्यणोः प्रोल्ललास ।
विदितविषयजाला आपरादावरं ये
दिदिशुरवनिभूत्यै ज्ञानशाखास्समस्ताः ॥ ३

जटिलगहनचेतस्तत्वमालोड्य सम्यङ्-
मनुजसमुदयस्य श्रेयसे सस्मरुर्ये ।
चिरतरचरितं, सद्धर्मसेतून्बबन्धु-
स्समलभत च धर्मः शाश्वतीं यैः प्रतिष्ठाम् ॥ ४

वयमिह सुचिरस्थं धर्ममेषां प्रवृत्ता
विपरिणमयितुं चामूलतो दृष्टवीर्यं ।
विनयमुपगतास्तान्संस्मरन्तो महर्षीन्-
प्रशममनुविशाम प्रश्रमादीदृशाद्द्राक् ॥ ५

# 3. ॥ कविताप्रासादः ॥

आविर्भवत्यखिलभांस्यवधीरयन्य-
  श्शब्दाह्वयेन महसा रचित पुराणः ।
प्रासाद एष महतां निवहेन, तुङ्गो
  व्यूढाकृतिस्स्थिरतर प्रियभारते नः ॥ १

ज्योतिर्मयात्किरणजालमतः प्रसर्प-
  न्नूनं प्रकाशयति ते जगदन्यथान्धं ।
वागस्य कर्तृरहिता विलसत्यदृष्टं
  मूलं दृढं रसनिधिः कुतुकान्वितानाम् ॥ २

रामायणं प्रथमकाव्य ममर्त्यतेजो
  वाल्मीकिना कविकुलस्य पितामहेन ।
आविष्कृतं, विरचितो जगतीप्रदीप्तो
  व्यासेन भारतमयश्च विभाहिमाद्रि ॥ ३

एतद्द्वयं मुनिकृतं भवति प्रतिष्ठा
  हर्म्यस्य निश्चलतरा रुचिरा विशाला ।
छायां ययोः कवय आश्रितवन्त एते
  रम्याणि चारुतरकाव्यगृहाणि चक्रुः ॥ ४

आश्चर्यवद्भवनमत्र बृहत्कथाख्यं
क्रीडागृहं शिशुकवेश्च, तथापुराणं ।
बद्धा परैर्हि निपुणैरियमाद्यभूमिः,
प्राज्ञोषिता विषय भावजिघृक्षयाया ॥ ५

निर्माणकर्मणि ततो विधयः प्रविष्टा-
स्स्वाभाविकत्वविरहस्तनुराविरासीत् ।
भूषानिवेशनमभून्न पुनः प्रभूतं
विस्मापकानि रचनानि तदोदितानि ॥ ६

सौवर्ण एष विपुलः किल हर्म्य भाग-
स्तत्र प्रधानरचकः कविकालिदासः ।
शाकुन्तलं सहृदयास्सकलेऽपि लोके
मेघं च ते न निरगुर्विविशुस्सकृद्ये ॥ ७

भासाश्वघोष भवभूतिमुखाः कवीन्द्रा-
स्सृष्ट्वाद्भुतानि रसपुञ्जनिकेतनानि ।
रङ्गोज्ज्वलानि विदधुर्नवभूमिकां तां
बाणादयोऽत्र कृतभूरिपरिश्रमाश्च ॥ ८

सारल्यहानिरधिका, कृतकत्वभूमा,
शब्दाढ्यतातिनिबिडा, ऽर्थदरिद्रताच ।
भूयस्समासघटना, ऽभरणातिसक्तिः
पश्चात्कृतौ ददृशिरे, विहतः प्रकाशः ॥ ९

गेहानि तानि विजनान्यविकस्वराणि
प्रायो जना विजहतीति किमत्र चित्रं ।
भूयोऽप्यदांभिकपथेन पुरादृतेन
पुष्टं प्रभाभरयुतं क्रियतां सुहर्म्यम् ॥ १०

---

## 4. ॥ पारस्पर्यम् ॥

पारस्पर्यं प्रभवति महान्धर्म एको जगत्यां
यद्व्यापारे प्रचलति सुखं लोकवृत्तान्तजातं ।
सूर्यस्सूर्यं ग्रहसमुदयं नित्यमाकर्षतीत्थं
ते चान्योन्यं, सहकृतिबलादम्बरे सुस्थिताश्च ॥ १

सूक्ष्मालोके क्वचिदपि दृशोर्मार्गमायाति किञ्चिन्-
नैवद्रव्यं विरहितपराधीनतं विद्यते यत् ।
आरभ्याणोस्सरसिजभवाण्डावसानं च याव-
द्धर्मस्यास्याधिकरणवशो वर्तते सर्वलोकः ॥ २

विस्पष्टं वै नरदिविषदां यज्ञसस्यप्रदानं,
बद्धावम्भोनिधिजलमुचौ सेव्यसत्सेवकौ च ।
भार्या भर्त्रौ नृपजनतयोर्बन्ध एष प्रसिद्धो
लोके चेत्थं प्रकृतिनियता बन्धुता नित्यसिद्धा ॥ ३

सर्वे यूयं सकलकरणैः कर्म नित्यं कुरुध्वे
जानीध्वेवा न फलमखिलैः प्राप्यते तस्यवेति ।
प्रायो याति श्रमिकरकृतं वस्तु भोगाय नास्य
व्रीहिं वासो न खलु लभते कर्षको वायको वा ॥ ४

इत्थंशानां जगति चलनं दृष्टमेकार्थसिद्ध्यै
चिन्त्यं त्वेतद्यदखिलगता स्वार्थता कापिजन्तून् ।
निर्बध्येमान्सुबहुलतया कारयत्युग्रपापं
व्यक्तिर्जातिर्जनजनपदा द्वेषदृष्टामिथश्च ॥ ५

---

## 5 ॥ प्रकृतिः कला च ॥

कान्तं यत्स्याज्जगति महितं चित्तसंरंजकं तत्
लक्ष्मीसंज्ञं ललितमधुरं चैकमर्धं यदीयं ।
भीमं रूक्षं हननकरणं चण्डचण्डात्मकं यद्
दुर्गारूपं भवति भुवने तद्यदीयार्धमन्यत् ॥ १

रूपं यस्याः किल भगवताऽथार्धनारीश्वरेण
स्वक्षि भ्रूसुस्मितघनकुचाद्यञ्चितं चातिरम्यं ।
पैनाकेष्वासफणिनिटिलाक्ष्यादि भीमं गृहीतं
सास्मन्माता प्रकृतिरुभयाकारभृद्बोभवीति ॥

देव्यास्तस्या शिशुरिह नरोऽतृप्तितस्तत्सुसृष्टौ
ज्ञानोद्धत्याऽजनयत कला, आह्लादाणवास्त्रं ।
शान्ता घोरा अनिखिलपदार्था भृश निर्मिताश्चै
नारस्सर्गो भुविविजयतेऽयं कलादेवताख्यः ॥ ३

इत्थं धन्यं नरकुलमहो यस्य भोगाय सन्ति
ज्योत्स्ना नद्यः पिकरुतसुमादीनि च प्राकृतानि ।
गेहारामादि चतुरकलाकल्पितं विद्यते यत्
काव्यं गीतं च ललितकलासंप्रदिष्टं यदन्यत् ॥ ४

भोगे यादृश्यधिकविधना तादृशी नाशने स्या-
द्विद्युद्धात्याक्रमिवनमृगं भीषणोऽस्त्येव लोकः ।
यन्त्रास्त्रैस्मोऽसुहरणचणैं भीकरोऽत्यन्तमद्य
प्रज्ञोन्मेषो न निधनकृते किन्तु भद्राय भूयात् ॥ ५

# 6 ॥ शकुन्तलास्वगतम् ॥

मारीचमा श्रममिमं मम चागताया
धारित्रतापसकुलैरभिकाङ्क्ष्यमाणं ।
वर्षाणि पञ्च समतीयुरशोभनाया
दीर्घाणि खेदबहुलानि कथंचिदेव ॥ १

किं जातमद्य यदनेन समुत्सुकाऽहं
किं वा भविष्यति सुखं मम दुःख भाजः ।
किं सङ्गमादिह परं नृपते स्सुखं मे
किं वा घटेत स ममात्र नृदुष्प्रवेशे ॥ २

पुङ्खानुपुङ्खविधया स्मृतयो गताना
मद्योन्मिषन्ति सुखदुःखविमिश्रिता या । ।
ताताश्रमे मृगकुलैस्सह वर्धिताऽहं
वृक्षान्लताश्च सलिलैरथ सेचयन्ती ॥ ३

दृष्टा नृपेण तमहं च निरीक्षमाणा
राग परस्परगतोऽजनि सद्य एव ।
अन्वागता मधुमया दिवसाः कथं ये
नीताश्च तेन सह विस्मरणं नु तेषाम् ॥ ४

संप्रेषिता तदनु भर्तृगृहं ससत्त्वा
तातं सखीयुगलमेणशिशुं लतां च।
सास्रा विहाय, मनसा बहु चिन्तयन्ती
गत्वा क्रमेण पुरुराजसभां प्रविष्टा॥ ५

तत्राशनेर्निपतनं, कृपया जनन्या
अत्रागमश्च, नृपते मम शोकहारी।
स्नेहस्य बन्ध उदभूज्जगतश्च भर्ता,
तप्ये ततोऽतनुतपांसि पतिं स्मरन्ती॥ ६

गाधेस्सुतो जनयिता परिवृत्तवर्णो,
मातातिमानुषकुला, परिपालको मे।
तातो महान्कुलपति, र्वसनं च शिक्षा
मुष्याश्रमे, पतिरहो भुवनप्रकृष्टः॥ ७

किन्त्वेष भर्तृविरह स्सुतरामसह्यो
नार्हामियं निरवधिश्च विभाति यो मे।
कामं निपीडयति, किं बत कारणं स्या-
द्राजा न धर्मपरमो यदवस्थिति र्मे॥ ८

हृद्धारिणी निगदिता किल मानुमत्या
वीक्ष्याङ्गुलीयकमसावधिगत्य तथ्यं।
ताम्यत्यहो मम कृतेऽनुशयाभितप्तो
यस्यान्तरे मम च तिष्ठति लोक एकः॥ ९

सख्यौ च ते विदितशापकथे प्रिये मे
नैवापराधसहिते कथितं तु ताभ्यां ।
आवश्यकत्वसमये प्रदिशाङ्गुलीयं
प्रीत्येति, भाग्यविरहात्पतितस्तु तीर्थे ॥ १०

तातं वनौकसमथैधितवन्तमेव
स्नेहाद्ब्रवीमि किमहं प्रति कृत्यविज्ञं ।
दुर्वाससा सुतपसा चरिते मदीये
मुख्यं हि कर्म कृतमस्य फलं त्वनल्पम् ॥ ११

दण्डः कृपाविरहितः परिकल्पितो यद्-
भर्तुश्च विस्मरणमेष च विप्रयोगः ।
मन्ये स दैवघटितः परिशुद्धिमार्गो
येनेह पावनतरा भवितास्मि नूनम् ॥ १२

आतिथ्यकर्मणि नियोजितवान् पिता मां
विस्मृत्य तन्नृपतिमेव विचिन्तयन्ती ।
नावेदिषं मुनिवरं समुपागतं तं
शापः फलं च विहिताकरणस्य युक्तम् ॥ १३

कामान्धयाऽऽचरितमेतद धर्मजुष्टं
सामान्यया वनितयेव पशुत्वभाजा ।
धर्मानियन्त्रित इहास्त्यशुभाय काम-
स्तस्माः कलङ्कनिचयास्तपसा मयाद्य ॥ १४

त्यक्तं प्रियात्वमधुना गृहिणीत्वमात्तं,
संयोगमत्र सुखि मे हृदयं ब्रवीति ।
जाने कथं स इति नैव, विधिर्बलाढ्यश्च ॥
शक्रस्य साह्यमथ कर्तु मसावयासीत् । १५

द्वित्रेष्वहस्सु पुनरागमनं च सिध्येत् -
मार्गस्य मध्य इह दर्शनकाङ्क्षयासौ ।
तिष्ठेत्कदाचिदिति चा शृणवं मुनीनां
स्यादेवमेव, भवतात्त्छुभसंगमो नः ॥ १६

---

## 7. ॥ अद्भुत भारतम् ॥

नद्योऽद्भुताश्शुभजला वनराजयोऽमी
तुङ्गा नगा जलनिधे रमणीयतीराः ।
पुष्पं फलं विहगजातमनन्तवर्णं
ज्योत्स्नाद्भुताऽमृतमयी मधुरर्तव श्च ॥ १

धर्मास्सस्थिरा श्श्रुतय आदिविवर्जिता या
अत्यद्भुताः प्रगतय स्सकलेऽपि शास्त्रे ।
यज्ञास्तपोऽध्ययनरीतय ईडनीया-
स्सद्व्यवस्थितिरियं समता न यस्याः ॥ २

किन्त्वेतदद्भुततरं यदिहास्ति येना-
दानं जुगुप्सिततमं निखिलेऽपि लोके।
संलक्ष्यतेऽधिकगुणं महितं च विज्ञैः,
शक्तो जगत्त्रयजयेऽत्र परिग्रहाग्नी ॥ ३

धर्मः प्रतिग्रहणमीरित आप्तवाग्भिः
न व्यक्तिगो विधिरयं सकलोऽपि वर्गः।
विप्राख्य एष निशितेन हि तेन बद्धो,
रिक्तोऽप्यसावखिलपूर्णतया विभाति ॥ ४

वर्गो भवेद्यदि कदाचिदयं धनार्थी
विप्रत्वहानिरुदियात्सहसैव तस्य।
निस्स्वत्वशस्त्रनिहतारिकुलाश्च विप्राः
स्वां जीविकां परचितैः कलयन्ति तुष्टाः ॥ ५

दारिद्र्य धर्मपरिबद्धजनौघपूर्णो
लोके किमस्ति वरभारतवत्प्रदेशः।
किं वा विधानमिदमेव सुदेशमेतं
धातुं न पारयति मूर्धतले परेषाम् ॥ ६

अर्थावशाः क्षपित भोगतृषा जगत्याः
क्षेमाय तेऽनवरतं व्ययितस्वकालाः।
रक्ष्याः कथंचिदपि ते धृतसत्वलक्ष्याः
रक्षन्ति संस्कृतिमिमां भुवनाद्भुतां ये ॥ ७

स्वातन्त्र्यलाभचरितं किल भारतीयं
भात्यद्भुतेष्वतितरां मकुटायमानं ।
त्यागाश्रयाज्जनतया परिवर्ज्य हिंसां
युद्धं प्रवर्तितमहो विजयो विचित्रः ॥ ८

---

## ४. ॥ भीष्म महात्यागः ॥

स्मृते भीष्मेऽ धृष्ये स्मरणपथमारोहति बृहन् -
नगानां राजासावुदधिनिवह श्चातिगहनः ।
नयागारापातो भुवनगुरुगाम्भीर्य भरितः
पृथुः प्रांशुर्देवालयसुविलसद्गोपुरगणः ॥ १

महान्धर्मी वीरः प्रसर मम वाण्यस्य नुतये
विचित्रं यस्यासीज्जननमिह चिन्तानभिगतं ।
प्रतिज्ञावैचित्र्यं प्रथितमवनौ यस्य भुवि च
त्रिलोकीचित्रं तन्मृतिचरितमत्राथ कथय ॥ २

प्रयत्ने कंसारेः प्रशमनविधौ हन्तविफले
प्रवृत्तिस्संरब्धा समरहरणाय द्रुततरं ।
कुरूणामाध्यक्ष्ये कुलतिलकभीष्म श्च निहितो
वृतोऽहं हन्यां नावददिति वरान्पाण्डुतनयान् ॥ ३

युयुत्सूनां व्राता रणभुवि समेता उभयतस् -
समं प्रातर्नेतृ प्रवरकुरुवृद्धेन झटिति ।
तथैव व्यूढाश्च द्रुपदसुतवीराग्रमणिना,
निदेशं चाकाङ्क्षन्प्रहरणममी दातुमतुलम् ॥ ४

तदानुक्त्वा कंचित्सरभस मगाद्धर्मतनुजो
व्यजानाद्धर्मं यः कृतदृढमति भीष्मशिबिरं ।
निहन्तु क्षत्राणां जयविलसदानाकयशसो
यथोपायं धर्मिन्प्रवद तव नत्वेत्यकथयत् ॥ ५

अवोचद्भीष्मस्तं सदयहृदयो वत्स समये
पुनर्मामागच्छेति चलतु रणं तत्र जयवान् ।
सुतः पाण्डोरेवं च निगदितवाञ्छन्तनुभवस् -
समक्षं वीराणां प्रबलकुरुशल्यं किल वचः ॥ ६

जगत्यां चारित्रप्रथितपुरुषाः केऽपि विदिता -
श्चरित्रे कस्यापि श्रुत इह न सन्धि पुनरयं ।
वरं पृच्छत्येको जलमिव वधाख्यं लघुतया
ब्रवीत्योमित्यन्यस्सममति रहो केयमनयोः ॥ ७

जनिर्वा मृत्युर्वा जनयति न भेदं कृतधियां
सदा ये धर्म्यासु प्रसितमनसः कर्मततिषु ।
तथापीयं चित्रा व्यवहरणरीतिः खलु तयोः
परः पक्षः स्वो वेति परिगणना यन्न बुधयोः ॥ ८

भटानामाघट्ट स्तदनु चलितो वेगघटितः
प्रवृत्तं ब्रह्माण्डप्रकटमतिभीमं प्रमथनं ।
भरन् भीष्मश्शस्त्रं निचय इव संख्ये च तडितां
बभासे तेजस्वी प्रलयसमयं स्साकलयति ॥ ९

अहान्यष्टावेवं तुमुलतरमायोधनम भूत् -
क्रमाद्भागो भूयान्निधनमगमत्पाण्डवबले ।
अथान्येद्यु र्धर्म श्चकितचकितो भग्नहृदयो
ययौ सास्त्रस्तूर्णं गुणवशगगाङ्गेयमविधम् ॥ १०

प्रणम्योवाचैवं "परनर! भवान्यावदजितं
विभर्त्येतच्छस्त्रं मम किल न तावज्जयमति ।
समायाता विद्धंस्तव हननवेला कथय मा -
मुपायं सद्यस्त्वं समयहरणं मा कुरु विभो" ॥ ११

"अवादीस्त्वं सत्यं भरति मयि शस्त्रं गुणनिधे
प्रहर्तुं शक्तो मां न भवति पुमान्कोपि जगति" ।
निगद्यैवं भीष्मः क्षणमिव स चिन्तापरिगतो
"यदि स्यादन्तो मे निहतमिह दुर्योधनबलम् ॥ १२

कथं कुर्यामेतां विदितविषय पक्षविहतिं
परित्याज्यो लोके विरहितगुणस्स्वोऽपि पुरुषः ।
परो ग्राह्यश्शिष्टस्स यदि गुणवान्नजकुलजो
विशिष्याराध्य श्चेति किल विदुषां तिष्ठति मतम् ॥ १३

मयैतावन्तं वै समयमुषितं कौरवगृहे
ऋणं तद्व्यावृत्तं युधि विविधसेवावितरणात् ।
करिष्येऽहं साधो गुरुविपदि साहाय्यमधुना
मदन्तस्योपायं कथयितुमिदानीं व्यवसितः ॥ १४

विनिश्चित्यैवं द्राक्कुरुवृषभ ऊचे नृपसुतं
"चरित्रं मे पूर्वं विदितमखिलानां शुभमते ।
निजाभीष्टं साऽम्बा मयि गुरुमुखेनालभत न
प्रसाद्याऽलब्धाथ त्रिपुरहरमस्तोकतपसा ॥ १५

वरं मद्घातार्थं, तदनुच विवेशानलमियं
समुद्भूता भूयो द्रुपदतनुजा सा स्मृतियुता ।
ततस्स्थूणाकर्णात्समधिगतपुंस्त्वाऽद्य च पुमान्-
शिखण्डीत्यस्याख्या निगदितमिदं देवमुनिना ॥ १६

तदाकार्ये सद्यश्शपथममुमात्मान्तरिति च
स्त्रियं वा स्त्रीपूर्वं प्रति युधि न युध्येय रिपुहन् ।
शिखण्डी स्त्रीपूर्व स्तमिममधुना वीरविजयः
पुरोधायाजौ मां त्वरितमपशास्त्रं प्रहरतु" ॥ १७

महात्यागी धर्मव्रतपरिवृढो धर्मजलधि -
र्वहो धर्मग्रन्थैर्भवति किल भेत्ता स्थिरमतिः ।
जनित्वा धर्मेणा नुपहत धृति र्जीवति तथा
मृतिं चानेनासावुपदिशति धर्मिव्रतमिदम् ॥ १८

# ९ ॥ वाग्वैभवम् ॥

अये वाक्चित्रा त्वं तव विभवलेशो मयि कृपा -
वशात्त संक्रान्तस्ते मम मधुना त्वत्स्तुतिविधौ ।
नियुञ्जेऽहं सद्यस्तनु नमतनुं येन महिमा
तुला नो यस्यास्ति प्रगुण इह वर्ण्येत निखिल ॥ १

पृथिव्यादीनां त्वं प्रभवसमयात्पूर्वम भवर -
समाश्रित्यैव त्वां सकलमिह सृष्टं बहुबले ।
विना त्वां शब्द ! स्याज्जडमिव जगन्मूकवदपि
प्रपञ्चस्मोर्थानां तिमिर इव भेदेन रहितः ॥ २

असाधारण्येन प्रविलससि नरे गीर्बहुविधा
न जाने जन्तूनां वचनमितरेषां प्रति भुवि ।
उदक्ताद्युत्कर्षः प्रबलतर एवास्य विदित -
स्तथापीयं श्रीस्ते खलु विजयते तस्य शिखरे ॥ ३

नरस्य व्यापारास्तव वशगता अत्र हि समे
समागाढुं वाक्त्वां यतत इह सर्वोऽपि सततं ।
परं कस्यापि त्वं न वशमयसि क्रीडनपरा
भजन्ती वैपुल्यं विपरिणतिमप्यूर्मिविलसिता ॥ ४

प्रयुञ्जानस्त्वां वाग्घृदयजनितान्भावनिचया -
न्नरो वारं वारं प्रभवति न सम्यक्कथयितुं ।
अयं हेतुर्लोके कलहनिवहानां जनगणे
न वक्तारोऽन्योन्यं हि मुहुरधिगन्तुं च विभवः ॥ ५

नराणामादर्शो दशरथसुतो राजतिलक -
स्त्रिकाले त्रैलोक्ये विदितचरितः पुण्यपुरुषः ।
प्रियं पथ्यं पूर्वं स्मिति मितियुतं सत्यमधुरं
स भाषे चावक्रं मृदु च वदतां य किल वरः ॥ ६

गुणालङ्काराणां कविगिरि निधाने ध्वनिरयं
प्रकामं चक्षाणोऽनभिहितमिहानन्दजनकः ।
परं त्वेतद्भङ्गप्रवचनपटुत्वं भुवि न वा
भवेत्साकल्येन प्रगतिसरणावित्यविदितम् ॥ ७

अशादृश्यं लोके लसति नरमध्ये गुणकृतं
मनुष्या ये केचिन्मनसि वचने चैकविषया ।
परे सन्त्येते ये वचसि हृदये भिन्नगतयो
यथा ख्यातं भावान्वरितुमपि युक्ता भवति वाक् ॥ ८

परिष्काराणां वाक्स्फुरसि दृढबीजं द्युतिकरी
विकासान्प्राप्ते ते जगदखिलमेकीकृतमिव ।
क्षणं ते साटोपाः परिजहिहि लीलाः शमयुता
प्रसन्ना सत्त्वाढ्या कुरु भुवनवासं सुखकरम् ॥ ९

# 10. ॥ श्रमप्रशंसा ॥

श्रमः कृत्स्नः पूज्यो भुवि हृदयपूर्वश्च हितकृत्
न नीचो नोच्चोऽस्ति श्रमिजनगणे सर्वविधया ।
श्वपाको राजा च स्थितिविरचने भेदरहितौ
रथे वा यन्त्रेवा न विसदृशभावोऽङ्गनिचये ॥ १

क्रियां कुर्वन्कर्मी निजनिखिलशक्त्यार्जवयुतो
रतिं पश्येत्तस्मिन्फलमनुपजेत स्वयमपि ।
अयं न्यायस्सत्यो हरिहरमुखानां दिविषदां
तथा नृणां चेयं श्रुतिनिगदिता कर्मसरणिः ॥ २

श्रियो वोढारस्तद्वहनपरिखिन्ना इव नरा·
प्रयासे शारीरे कथमपि न जातु प्रमुदिताः ।
धनप्राप्तं पूर्णं सुखमनुभवन्ति श्रमकृतां
प्रकोपायाजस्रं प्रकटितनिजोत्कर्षमतय ॥ ३

श्रमो वित्त प्रज्ञा त्रितयमिदमैश्वर्यजनकं
वितीर्णं विश्वेषां समुदिततया मङ्गलकृते ।
न कस्यापि स्वत्वं भवति सकलं न्यास इति च
प्रजायेतेयं धीर्यदि भुवि भवेत्स्वर्गविभव· ॥ ४

अहंताढ्या आढ्या श्चरणचलनं दारुदलनं
निकृष्टं मन्यन्ते च कृषिमवलिप्ता परभृताः ।
परेषां साहाय्यं श्वसितुमपि वांछन्ति कृपणाः
कथं स्वायत्तानां श्रमरतिरमीषां न विषयः ॥ ५

मतेस्संपत्तिर्वा भवतु धनसंपज्जनिमतां
श्रमं ते शारीरं फलदमिह कुर्युः प्रतिदिनं ।
यथा स्याल्लोकोऽयं श्रममय उदात्तो बहुफलो
यथा च न्यक्कारः श्रमिहृदयवर्ती बहिरियात् ॥ ६

विवेकस्या धीश्यं परिषदि न भाति प्रभवितुं
विनोदं कुर्वाणा विरतिसमये ये किल जनाः ।
नटा गातारोऽन्ये धनभरहराश्चैव बहुशः
श्रमी नो पर्याप्तं लभत इह भर्तुं गृहगतान् ॥ ७

स्थितः प्रच्छायेषु द्रविणमधिकं कोऽपि तनुते
प्रयस्यंस्तापे यः प्रतनु भजते वेतनमयं ।
वपुर्वीर्यान्नाम प्रबलतरमास्तां मतिबलं
तथाप्येषोऽधर्म्यो विजय इति भात्येव सुदृशाम् ॥ ८

# 11 ॥ रजो विलासः ॥

अन्तर्बहिश्च परितो रजसावृतोऽहं
तस्मिन्निमग्नमनिशं नयनं मनश्च ।
ईषत्स्फुरद्रुचिरसत्त्वकरावलम्बा
दुन्मज्ज्य वच्मि कुतुकाल्लघु तद्विलासान् ॥ १

लोके प्रवृत्तिरखिला रजसो विकास -
स्तच्छासने सपदि नृत्यति सर्वजन्तुः ।
चैतन्यविस्फुरणमेतदधीनमेव
प्रख्यानदुर्लभनराद्भुतभूमकृत्तत् ॥ २

आक्रम्य सत्त्वमतिदीनमिहाग्रहेण
प्रायो रजो वितनुते स्वयमेव राज्यं ।
स्वप्राभवं प्रकटयत्यवनौ नरेऽस्मिन् -
रागं च मन्युमजितं जनयत्प्रकामम् ॥ ३

कामः करोति भुवनं कवलं किलैकं
व्यात्ताननो भ्रमति च ग्रसितुं ततोऽन्यत् ।
क्रोधो महान् परमकारुणिको न लोके
हातुं सहेत तृणमप्यपरस्य हस्ते ॥ ४

लीलाविभूतिरनयो र्भवति प्रपञ्चर -
 संसारकर्मनिचयस्य च चोदकौ तौ ।
स्तैन्यं वधस्समर आक्रमणं च वैरं
 दैन्यं छलं कपटता बहुधा चरन्ति ॥ ५

भग्नात्सितात्किमु रजः प्रसृतं सुसत्त्वात्
 संप्राप्य वर्णनिकरं लसतीह रक्तः ।
यत्रैष जृम्भति गुणो ऽखिलदम्भबीजं
 क्रीडन्ति तत्र बलवद्भुवि वर्णभांसि ॥ ६

विज्ञा अमानुषकुले कथयन्ति वै स्त्री -
 रागोत्सवः प्रचुरवर्णयुताः पुमांसः ।
इत्येव किन्तु नियमोऽप्युभयो र्नृलोके
 भूयो विवेकवति दृश्यत एव चित्रम् ॥ ७

शक्ते र्धनस्य समयस्य च भूरिभागो
 व्यर्थीकृतो भवति संसदि वेषवृद्धौ ।
आवश्यकार्थकरणे विनियुज्यते चे -
 दंशोऽस्य कश्चन सुखं भवितैव नूनम् ॥ ८

विद्याश्रमा यतिमठालय यज्ञशालाः
 स्थानानि यत्र नियतं भुवि सात्विकत्वं ।
तत्रापि ताण्डवमहो रजसो नितान्तं
 तत्तादृगस्य जयतः खलु विक्रमौघः ॥ ९

किं नागतोस्त्यवसरोऽस्य निरोधनाय
संस्थापनाय महितस्य च सत्त्वभूम्नः ।
यावत्स्फुरन्ति भुवने स्थिरतां प्रपन्ना
शान्ति ध्रुवाऽकितवता शुभधीश्च तृप्तिः ॥ १०

---

## 12 ॥ सती ॥

लसन्त्याख्यानाभि प्रबलतर राजन्यचरिते
नृलोकेऽन्यत्रापि श्रुतबहुगुणा यत्र युवतिः ।
युवानं शत्रूणां कुलजमकरोत्स्वप्रियपतिं
ततश्चेयं स्नेहात् पितृपतिगतात् क्लेशमवहत् ॥ १

त्रिलोकेशः पूर्वं वटविटपिनो मूलतलभाङ् -
मुमुक्षूणां मौनात्परमकृपया मार्गमदिशत् ।
ततस्स्मायं देवः परिणयति दक्षस्य तनुजां
तया देव्या साकं च सुखमवसच्चिरतरम् ॥ २

द्युलोके जात्वासीद्बलवदुपजापः प्रति शिवं
महेशत्वं तस्यापलपितममर्त्यैर्मदवशैः ।
प्रतीक्षां चक्रुर्येऽवसरमवमन्तुं च कुधियो
विना हेतुं द्वेषो महति हि विनाशस्य समये ॥ ३

स दक्षो द्वेष्टृणामधिपपदमास्थाय बहुशः
पुरो नन्दीशस्या कुरुत शिवनिन्दां द्युसदसि ।
शशापायं द्राग्यः तनुत इह हित्वा शिवहवि -
र्मखं शीर्येतास्याथ शिर इति च स्यादसुरभीः ॥ ४

प्रवृत्तिस्ताद्दक्षे भयशिथिलिता भूत्किल सवे
स्वयं दक्षः कर्तुं तदनु चलितोऽहंयुहतकः ।
अशेषास्सम्भारास्स्वपदसदृशा स्संविरचिता
निर्लिपाश्शालायां च समुदलसन्मोदभरिताः ॥ ५

अनाहूता पित्रा भुवनजननी विश्वविनुता
सचिन्ताभूद्देवी व्यथितहृदया कर्मणि पितुः ।
अहो दर्पान्धत्वं प्रियदुहितरं मां न गणयन्
पतिं मे भूतेशं स कथमवमन्तुं कृतमतिः ॥ ६

अकार्यस्याकारं परिणतिमयं चाविदितवान् -
प्रमूढा धी श्चास्य प्रचुररजसा गाढतमसा ।
विपत्तिर्ब्रह्माण्डप्रलयजनिका निश्चयभवा
निवर्तेताय किं, जनक तव सर्गो नु किमयम् ॥ ७

पितृ[illegible] वस्त्वरयति च गन्तुं तव पुरो
ममाद्या[illegible]ो याचे पतिमहमनुज्ञां प्रियकरं ।
विमृश[illegible] पृष्टस्तदनु शिवया शङ्करविभु -
[illegible]वा[illegible] देवीं सुभृशमनुमेने कथमपि ॥ ८

प्रविष्टायां सत्यां पितृशुभचिकीर्षौ सवसभां
प्रवृत्तस्तां दृष्ट्वा हसितुमवलिप्तस्सुरगणः ।
उपेक्ष्यैतद्देवी पितरमुपसृत्यानतवती
परीतं विष्ण्वाद्यै स्त्रिणयनवधूटी स्फुटमदम् ॥ ९

विनीतिं मूर्तां तां निधनमधिगन्ता स जनकः
क्षणे तस्मिन्मग्नस्स्वमहिमनि दीक्षामुपगतः ।
अपीमां नाद्राक्षी च्चरणपतितां लोकजननीं
पदार्थ स्सत्त्वाढ्यो न हि पतति दृष्टौ मदजुषाम् ॥ १०

शुचा देवी नष्टं पितरमनिवर्त्यं च वचनैः
प्रबुद्ध्यैषा शालामतिझटिति मुक्त्वा परशिवं ।
प्रपद्य प्रोवाचेत्यव पितृमुखान् दण्डविधिना
पति प्रेयान् लोके सततमितरे यावदनघाः ॥ ११

# 13. ॥ प्रज्ञाविपरिणतिः ॥

पश्यन्त्येके प्रकृतिविकृतिं स्वात्मभासैव साक्षात् -
मेधावीर्याद्गहनतरमप्यर्थसार्थं विदन्ति।
प्रीता माताऽथ च विवृणुते स्वीयरूपं समस्तं
भान्ति प्राज्ञा ऋषय इह ते तत्त्वविज्ञानदीप्ताः ॥ १

अन्ये सर्वे श्रवणपठनैर्ज्ञानवृद्धिं लभन्ते
शब्दान् ग्रन्थान् महितमहतामात्मसात्कुर्वते च।
पत्रेष्वेते कृमय इव संख्यातिगाः पुस्तकानां
लग्ना वर्णान् सपदि शतशस्सत्वरं भक्षयन्ति ॥ २

गुर्वी तृप्तिः किल जनिमतां तावता वै बहूनां
स्वेषां नायुष्यधिकमपरं लब्धुमेते यतन्ते।
एषां मध्ये कतिपयजना भूरिपत्राणि जग्ध्वा
क्रान्त्वावस्थां कृमिकुलनिजां कीटभावं भजन्ते ॥ ३

खादन्त्येते भुवि विरचितान् पुस्तराशीनशेषान् -
शक्ता श्चाप्युद्दलितुमखिलं पङ्क्तिशो ग्रन्थकीटाः।
ग्रन्थादन्यत्स्वयमिह न ते मन्वतेऽवस्थितं यत् -
ज्ञानं तेषां परिमितमहो यद्द्वितीयोक्तिलब्धम् ॥ ४

अन्ये केचिद्विरलविरलास्संवृताः पुस्तकान्ते-
भावग्रामे रनिशमखिले स्संविशन्तस्समाधिं ।
कालं कंचित् कृतवसतयः कल्पतसंविन्मयाण्डे
प्रज्ञारूपं प्रणिहितधियो नूत्नमन्यत्पचन्ति ॥ ५

अण्डं भित्वा तदनु विभवो जातपक्षा डयन्ते
प्रज्ञा चैषां विगतविशया निश्चिता संविभक्ता ।
नास्मिल्लोके भवति सुहृशामद्भुतं विप्रियं वा
तादृक्प्राज्ञा जगति मनने नेतृतां यान्तिमुक्ताः ॥ ६

---

## 14. ॥ हृल्लोकः ॥

विद्धि त्वां नर जीवल्लोकवसतिं कर्तुं यदीच्छा सुखां
वृत्तीश्चित्तविसृत्वरीरहरहस्संमृश्य तत्वेप्सया ।
वीक्षस्व प्रथमं क्रियांस्त्वयि गुणस्सत्त्वेन संशोभितस्
संपश्येश्च सुविस्मयाय सकलास्सन्त्यन्यथेति द्रुतम् १

हृल्लोके तव केवलं न वससि त्वं किन्तु घोरामृगा -
श्श्वानव्याघ्रशृगालकुञ्जरमुखा अप्यत्र तत्तादृशाः ।
पर्यायादथवा समे समुदिता प्राक्रम्य यत्त पदं
स्वोच्छ्रायंच विधाय सम्यगनिशं त्वां तन्वते न्यक्कृतम् २

पूर्वं त्वं किल वासमेभिरकरो वैन्यैं र्वने सङ्गतो
बुद्धे र्वीर्यविजृम्भणादथ च तान्जित्वा वशं प्रापयः ।
एते ते स्वपराभवं हृदि गुरुं कृत्वेव पृथ्वाग्रहा -
त्वां प्राप्तं पुरमद्य नो विजहति त्वच्चित्तमाक्रम्य भोः॥ ३

धीशक्त्या ध्रुवमेव निर्जितवता बाह्यान्मृगान्प्राक्त्वया
विद्राव्या न तथा सुखं मतिमता संचारिण श्चेतसि ।
उद्बोध्यस्तव चित्तगूढविलसद्धर्मस्फुलिङ्गः कृशस् -
संदाह्याः क्रमशस्त्वया मृगकुला धृत्वा धृतिं वै हठात्॥ ४

कृत्वैवं सुचिरं मदाद्यवगुणै स्संलक्षितान्प्राणिनो
दूरीकृत्य शमादिभिश्शुभगुणै रापूर्य चेतोऽखिलं ।
संपूर्णां नरतां समेत्य मधुरां जीवेर्यदा ज्ञानभास् -
संसारस्तव भूरिमोदभरितो भायात् सुशुभ्रस्तदा ॥ ५

---

# 15. ॥ एकाकी ॥

एकाकी विस्तृतेऽस्मिन् जगति बहुजने संचरामीव जाने
नानाप्रज्ञान् प्रभिन्नान्मतगुणचरितेष्वन्वहं लोकयामि ।
सल्लापादीन्करोमि प्रचुरपरिचयात्साकमेतैश्च हार्दान् -
प्रायो भिन्ने मदीयात् पथ इह सकलाः प्रक्रमन्ते विचित्राः १

दैवीं सिद्धिं प्रपत्तुं विपुलतरमहामन्त्रमार्गप्रविष्टाः
केचिद्यन्त्रे च तन्त्रे निजनिखिलमनस्सन्ततं सन्निवेश्य ।
पूजां कुर्वन्ति दीर्घां बहुलसुमचयैः कृच्छ्रलब्धैस्सुवर्णै -
र्देव्यादीनां निकामं पृथुफलजननीं श्रद्दधाना नितान्तम् ॥ २

केचिल्लोके धनार्थं निरवधिसमयं त्यक्तनिद्राविहाराः
स्वीकुर्वाणाः प्रयत्नांश्च समधिकतरान्यापयन् त्यात्मतुष्टाः ।
देवं कंचित्स्वक्लृप्तं मनसि कबलिते निश्शुचित्वेन भूयः
कुर्वन्तो द्रव्यलब्धै रुपचरणशतैस्तं भजन्ते च हृष्टाः ॥ ३

अन्ये केचिज्जगत्यां हठसरणिमिमामाश्रितास्सिद्धिलब्ध्यै
प्राणानां यन्त्रणाद्यैर्निजहृदि चरतां प्राप्तुमिच्छन्त्यभीष्टान् ।
जीवब्रह्मादिचर्चानवरतनिरताः केचिदन्ये रमन्ते
शब्देष्वायुश्च यावत् कृतपरिचितयो ह्युग्रघोषान्वितेषु ॥ ४

यानानाडम्बराक्तानपि परिहर तान् पूर्णभावं यदीच्छे -
रन्तस्स्थान् सद्गुणांशान् विचिनुहि कणशश्चास्मितां सन्निहत्य ।
जीवेरन्यार्थमित्थं क्वचन च पुरुषं घोषयन्तं न वीक्षे
सर्वो दम्भप्रियोऽस्ति प्रतिनिभिषसदाचारसक्तो न कोपि॥ ५

---

# 16. ॥ अष्टमूर्तिस्वरूपम् ॥

ब्रह्माण्डानि प्लवन्ते यदुदरविवरे नौकुलानीव सिन्धौ
कल्लोलानां प्रवाहः प्रसरति निबिडो यत्र भाविद्युदादेः ।
यस्या ज्ञाने प्रमुग्धा अपि नरमनस श्चैव विद्वद्वरेण्याः
केशो रुद्रस्य या सा लसति सकलसूरादिमा व्योममूर्तिः॥ १

आकाशो बुद्धिलभ्यस्तनुभवपवन श्चाधिगम्यस्त्वचासौ
प्राणाधारोऽखिलानां स्थिरचरवसुधाजन्मिनां श्वासभाजां
कुर्वाणस्साहचर्यं तनुजहुतभुजो जीवदश्चांबुदानां
नादानामाश्रयो यो मसृणसरणकृद्भाति नित्यं खगानाम्॥ २

अग्निर्जीवस्य चिह्नं नरसुहृदतुलः पावकः शुभ्रमूर्तिः
पर्यायेण प्रकाशं ददहनि यथा सूर्य एषोपि रात्रौ।
आर्याणामग्रदेवो निखिलमखभुजां हव्यवोढा शिखावा -
नाहर्ता सभ्यताया असुरभयकरो भाति चाथर्वणस्सः॥ ३

आपस्सन्ति प्रतिष्ठा स्सुतृषितजगत श्चामृतत्वं भजन्त्य -
स्तिस्रोऽवस्था· प्रयान्त्यो भुवि पदमखिलं व्याप्नुवन्ति
[ प्रकीर्णाः ।
वर्षाकारेण पृथ्वीं तदनु च सरितामात्मना थार्द्रयन्त्यो
जीवान् सर्वान् विशन्त्योऽशनरसमिलिताः प्रापयन्त्योऽ
[ समेषाम् ॥ ४

भूतानां या गरिष्ठा पृथुवरपतिना लम्भिता बीजवापा -
नुद्भिज्जस्य प्रसूतिश्च पशुखनिजयो र्भारवोढ्री धरित्री ।
पृथ्वी प्रेष्ठा च दात्री जलफलकुसुमैश्शोभिता विश्ववन्द्या
सेव्या मूर्त्यन्तरैर्या प्रभवति महिषी योपमा च क्षमायाः ॥ ५

अर्कस्त्रैलोक्यदीपो ग्रहसुपरिवृतो बंभ्रमीति स्वयं यो
वीक्षांकुर्वन्यथावत् पदमुपरि बृहज्ज्योतिषां संप्रयाणं ।
प्रास्यंस्तेज श्चतापं धरणिसुखकरं दूरतो धर्मकन्दः
मैत्र्या जन्तून् प्रबोध्या श्च नियमयति तान् कर्मसु
[ स्वेषुनित्यम् ॥ ६

चन्द्रोस्मत्प्रीतिमूर्ति र्हरशिरसि लसत्पुष्पपुञ्जो मनोज्ञः
स्वीयान् पीयूषकल्पान्कि रति करमयान् सुस्वरान् गायकाभः ।
ज्योत्स्नापूरे च तस्य प्रवहति सुमहान् सिन्धुरुज्जृम्भते द्रा
गाह्लादेन प्रपूर्णा श्च हृदयकुहराः प्राणिनां प्रोत्तरङ्गाः ॥ ७

धर्मानेवाचरन्यस्सततमिह जगत्कर्मनेता च होता
सृष्टीनामीश्वरोयं किल परतनुवल्लोककार्यैकनिष्ठः ।
अत्ता चै वान्नमेषोऽनुभवति हि तनू भुंज्यते चाप्यमीभि -
र्ज्ञानश्चैजं स्वरूपं चरति यदि नरो याति तूर्णं
[ स पूर्तिम् ॥

---

## 17. ॥ विरावोपद्रवः ॥

रटति करटवृन्दं कुक्कुरा बुक्कयन्ति
प्रगतनगरमध्ये शृण्वतो रावराशीन् ।
श्रवणकुहरतोदान् कृत्रिमान् प्राकृतोसा -
वयति न विषयत्वं तादृगल्पोऽस्त्ययं हि ॥ १

इह नरगणजल्पः पण्यवीथीष्वजस्रं
क्रयविनिमयकर्मण्यात्तपोषोऽतिरूक्षः ।
रविरुदयति यावन्नैव तावद्विशन्ति
द्रुततरमथ रथ्याविक्रयक्रोशकाराः ॥ २

अहमहमिकयायं शब्दगुम्फां श्चकृत्वा
कपिफणिवृषढक्कासंयुतो भिक्षुवर्गः ।
प्रतिगृहमुपयात श्चोदयादादिनान्तं
कलयति नरकं द्राग्लब्धुमीषद्गृहिभ्यः ॥ ३

सुरभवनतडाका भुक्तिशाला श्च नद्यो
  रटनशतविदीर्णा श्चापि विद्यार्थिवासाः।
विरटनविनियुक्त श्चेद्सूरक्षितोऽयं
  भवति च शमवृद्धिः क्षुत्क्षयो दीर्घमायुः॥ ४

प्रवहणनिवहानां यन्त्रनिर्मापितानां
  खररवनिचयै र्यो भूतले व्योममार्गे।
कमिह विरचितं तं वच्मि कोलाहलं यो
  भ्रमयति नरचित्तं वर्धकोत्थै श्च घोषैः॥ ५

प्रतनतरदिनेषु प्रस्थिता विश्रमार्थं
  प्रति वनभुव मेवं, येषु वासो नगर्यां।
अभवदनिविडश्च प्राकृतो दम्भवर्जो
  यदि नगर इदानीं शान्त एकस्सदेवः॥ ६

---

# 18. ॥ अवस्कर हरणम् ॥

नरस्य व्यापारं सकृदिव विचारं नयसिचे –
द्विना क्लेशं पश्येस्सकलमिममस्मिन्हि घटितं ।
मलानामुत्पादस्तदपहरणं चैव सततं
मनोवाक्कायैर्यैत्परतरमिनो नेति किमपि ॥ १

अवेक्षांकुर्वाणा गिरिकुलसमावस्करचया-
पुराणां वीथीषु प्रतिदिवसमात्तानपसृतान् ।
कथं भावाः पूता अपि नरसमाजे प्रकृतिजा
विजानीयुर्यान्तीत्यनुभवगता अस्य मलताम् ॥ २

जुगुप्सन्ते येभ्यस्स्वतनुजनिमद्भ्योऽपि मनुजा
वहन्त्येतान्यन्ये शिरसि हि मलान्यादरभराः ।
प्रविभ्राणाश्शुद्धिं प्रतिपदममी ये मलहरा
नमस्कार्या नित्यं भुवि नरकविद्रावणचणाः ॥ ३

असत्याद्धिंसाया श्च सकलमलानां प्रजननं
नरस्तान्युद्धर्तुं विरचयति राज्यं बहुविधं ।
मनोदोषाणामुद्धपनकरणे निर्मलधियो
युता आचार्याद्या निखिलमलमालोद्भवकृताम् ॥ ४

अशुद्धे र्निष्पत्ति र्व्यपगमनमाने प्रयतिते
विभात्यस्मद्भीत्यै प्रथममवशिष्टं प्रतियुगं ।
तथा चेदासृष्टेः कतिपयबुधोद्दिष्टजननं
युगं सत्यं दूरे भवति यदि सत्त्वे न नरधीः ॥ ५

---

## 19. ॥ स्त्री ॥

शक्तिस्त्वन्नामधेयं स्त्रि जयसि सहसा पुंस आक्रम्य तेजः
वीर्यं शक्नोति लोके क इह कथयितुं भूरि सौन्दर्यशास्त्रे।
अर्धं त्वद्रूपमन्यज्जगति कलयसि स्वीयमर्धं यथेच्छं
नास्मिंस्ते विस्मयन्ते तव विबुधवरा ये महत्त्वं विदन्ति ॥ १

एका व्यामोहय किं न दनुजनिवहान्विभ्रमौघैस्सुधेप्सून्
किं लावण्यप्रवाहे तव मुनिनिचया दारुकायां न मग्नाः ।
चिन्तां नीते त्वदीये वशकरणबले विश्वतोजृम्भमाणे
पर्याप्ता किं न रेखा तव भवि विजयार्थं किमर्थं तदर्धम् ॥ २

मूर्खत्वेनोन्नटन्तं दमयितुमवनौ या प्रवृत्ता पुमांसं
लालित्येन, स्त्रि कार्यं निवहसि जगतो निस्सपत्नं प्रधानं ।
उत्कृष्टं मातृभावं किल सकलहितं वोढुमत्रोन्मिषन्ती
पुंभावो यत्र तत्र प्रविलससि मुदा वृद्धिमापादयन्ती ॥ ३

माधुर्यं स्तम्भयत्ते निवसति वदने किन्नु नेत्रेऽथवौष्ठे
तर्को भातीदृशो मे वितथ इव तव प्रीतिकृत सर्वमेव ।
प्रेक्षा वाचा स्मितं च स्थितिगमनलसच्चारुता मोहयित्री
राज्यानां यच्चरित्रं जगति तदखिलं तावकीनांगलीला ॥ ४

तत्त्वादृक्ते गुरुत्वं यदपि विरहिता श्चेतनत्वेन विश्वे
स्त्रीलिङ्गेन प्रयुक्ता भुवि भृशमहिताः कौमुदी द्वे च सन्ध्ये ।
क्षोणी नद्यो लता द्यौः परिषदपिसतां वाग्बुधानां कथा या
संख्यानं कीदृगेतत्स्रवति मधुरिमा यत्रवै स्त्रीत्वमत्र ॥ ५

---

## 20. ॥ तपश्शीलता ॥

लोकेऽस्मिन्सुमहान्ति कर्मघटनान्यान्तं वहन्त श्च ये
सर्वे ते विलसन्ति मानवकुल श्रेष्ठास्तपोऽलंकृता ।
तेषां बुद्धिरमन्दचेष्टनपरा लक्ष्यैकबद्धा दृढं
निष्कम्पा सुखभीतिहेतुनिचयैरास्ते शिलासन्निभा ॥ १

पूर्वं हैमवती सुनिश्चयवती स्वीयं प्रति प्रेप्सितं
तेपे निश्चलसत्त्ववृत्तिरबला धीरा मुनिश्लाघिता ।
भूयिष्ठं च तपांसि, तुष्टमतुलं लेभे पतिं त्र्यंबकं
जेतुं यं न शशाक नेत्रघृणिना दग्धश्च चेतोभवः ॥ २

सावित्री स्वपतिं विहीनवयसं ज्ञात्वा चकार स्वयं
पातिव्रत्यसुतीक्ष्णदिव्यतपसा दीप्ता सिषेवे गुरून् ।
भर्तारं च, जगाम सार्धममुनाऽरण्यं दिने दारुणे
तत्र प्राप महत्त्वतो मृतपतिं मृत्योः पुन श्चाशिषः ॥ ३

सर्वोत्कृष्टगुणो मृकण्डुतनयः पित्रा वृतो लब्धसु –
र्बालोऽभ्यन्तरगूढदाहनिवहं पित्रोर्विदित्वा व्रती ।
स्त्रीयं षोडशवर्षकालकलितं दीर्घं विधास्यन्वयो
रक्षामाप च कालकाल भजनात्काल श्च दूरीकृतः ॥ ४

विख्यातिर्भुवि भाति भारतभुवो यत्सर्पिनिर्मापिता
येषां वृत्तिरभूच्च धर्मचरणे यद्वै तपश्शाश्वतं ।
नालं वक्तुमियं हि पूर्वनियतिः पूर्णैवमास्तेऽधुना
यावच्छक्ति तपस्विशीलमखिलैः श्रेयोऽर्थिभिर्गृह्यताम् ॥ ५

---

# 21. ॥ स्वाश्रयः ॥

नरस्यार्था यावत्सरलगतयस्तावदिह स
स्वकां शक्तिं मत्वा चरति भुवने मानरहितां ।
मदान्धः प्रारम्भान् विरचयति चोच्चावचगुणान्
फलं त्वेषां शश्वद्भवति विपरीतं च धृतिमुट् ॥ १

क्षणादस्मात्किञ्चित्प्रविशति भयं तस्य हृदयं
न निर्गच्छत्येतत् किल पतनमाचास्य वपुषः ।
बिभेत्यस्मिल्लोके स चलति तृणेचाप्यरिधिया
प्रणश्यत्या श्वस्य स्वकगरिमचिन्ता विशिथिला ॥ २

उपायाः प्रोच्यन्ते कुशलिभिरदृष्टार्थघटके
र्नरो ये तान्भक्त्या श्रयत इह विघ्नस्य हतये ।
उपास्ते दैवज्ञान् जपति फलकाङ्क्षी मनुगणान्
मुहुर्जिज्ञासास्य प्रति शकुनधर्मान् कृपणिनः ॥ ३

किमित्यस्य स्थाने नर इह न गृह्णाति शुभदं
स्थिरं धर्मं नित्यं फलमपि यदीयं च जगते ।
यथा निर्भीकोऽसौ सपदि गतशुक्स्वाश्रयबलो
विमुक्तो भावेभ्यः परवशकरेभ्यो विजयते ॥ ४

# 22 ॥ तदानीमिदानीं च ॥

नासन्नो सत्तदानीं प्रतिसमयममुं वच्मि दूरे न वाचा
मा विर्भूतप्रपञ्चं मनुजकुलमुदैत्कालमेतं ब्रवीमि ।
क्रव्यादै राक्षसै र्भूरसुरकरटिभिः क्रूरकृत्यैश्च पूर्वं
संक्रान्तारण्यकोणे नैरवसितमभून्मध्य एतद्व्रजस्य ॥ १

घोरान्बुद्ध्या नियम्याशुनिशिततरया दैवयोगाच्च शश्वत् -
प्राबल्यं स्वं मनुष्यः कथमपि विदधे मेदिनीकृत्स्नभागे ।
उद्गच्छत्यस्य पश्चाद्वसनविषयिणी चिन्तना पूर्वतोऽत -
श्चित्रैः पाषाणखण्डै र्वपुरलमकरोदस्थिभिर्यैः कपालैः ॥ २

आप्रत्यूषप्रदोषं भ्रमणमुदरसंवर्धनार्थं च युद्धं
भ्रातृव्यैश्शास्त्रहस्तैस्सह सहवसनैर्विद्यते यस्य नान्तः ।
मध्ये नृत्यं च गानं घनरवसहितं योषितां मण्डलेऽस्य
स्त्रीणां पृष्ठेऽनुसारः प्रतिदिवसविधिर्योऽर्थकामप्रयुक्तः ॥ ३

आरण्यस्यास्यवाण्यां शिशुवचन इव प्रायशो गीतमेव
स्वादिष्टाश्शब्दगुम्फा श्चकविसमुचिताः प्रास्रवंस्तत्प्रसंगे ।
आस्तामेतत्किमस्मिन्परभुवनपरा बुद्धिरासीच्च धर्मः
